# नष्टकुण्डल्याश्च विचार:

डॉ. सीमा शर्मा

**(क) अङ्गुलिषु तिथिस्थापनम्**

शास्त्रेषु पञ्चतिथय: कथिता: नन्दा- भद्रा-जया-रिक्ता-पूर्णाश्चेति। यथा रामदैवज्ञेनापि कथितम्-

**''नन्दा च भद्रा च जया च रिक्ता पूर्णेति तिथयोऽशुभमध्यशस्ता:।**
**सितेऽसिते शास्तसमाधमा: स्यु: सितज्ञभौमार्किगुरौ च सिद्धा:।।''**

हस्ते ताराद्या: क्रमेण नन्दा-भद्रा-जया-रिक्ता-पूर्णा: तिथय: स्यु:। तत्र तु कृष्णपक्षे दर्शे सूर्येन्दुसङ्गमोऽपि विद्यते। तथा तारादि-अङ्गुल्यादीनां पर्वत्रयेषु क्रमात् प्रतिपत् षष्ठी एकादशी च तिथय: ज्ञेया:, एवं प्रकारेण शेषपर्वसु शेषा: तिथयोऽपि अवस्थिता:। यथोक्तं सामुद्रिकरहस्ये-

**''नन्दा भद्रा जया रिक्ता पूर्णा: स्युस्तिथय: क्रमात्।**
**ताराद्या: कृष्णपक्षे तु दर्शे सूर्येन्दुसंगम:।।**
**तारादित्र्यंशके ज्ञेया प्रतिपत् षष्टिका तिथि:।**
**एकादशी च क्रमत: शेषं शेषास्ववस्थितम्।।**

**स्पष्टार्थचक्रम्-**

| तिथिसंज्ञा | मूलपर्वम् | मध्यपर्वम् | अन्त्यपर्वम् | अङ्गुलीनां नामानि |
|---|---|---|---|---|
| नन्दा | प्रतिपत् | षष्ठी | एकादशी | कनिष्ठिका |
| भद्रा | द्वितीया | सप्तमी | द्वादशी | अनामिका |
| जया | तृतीया | अष्टमी | त्रयोदशी | मध्यमा |
| रिक्ता | चतुर्थी | नवमी | चतुर्दशी | तर्जनी |
| पूर्णा | पञ्चमी | दशमी | पूर्णिमा/अमावस्या | अङ्गुष्ठ: |

**हस्तेन तिथेष्टसाधनम् –**

**''यस्यां निरीक्ष्यते हस्त: सा तिथि: स्याद्दिनोदये।**
**घटीचतुष्टयं शेषास्तदनुक्रमतो मता:।।**
**हस्तवीक्षणवेलायां या तिथि: समुदीयते।**
**तदाऽङ्गुल्या: स्वरूपेण वाच्यं सर्वं शुभाऽशुभम्।।**
**एवं तिथिफलं ज्ञेयं त्रिपुरांशस्य दर्शनात्।**
**जातिदिग्द्रव्यराश्यादेर्लभ्यालभ्यप्रवृद्धये।।''**

यथा श्रावणमासस्य कृष्णपक्षस्य एकादशीतिथ्यां कश्चन प्रश्नं पृच्छेत् 10.30 घट्यादिषु। अर्थात् सूर्यादयात् 4 घटीं यावत् एकादशी, या कनिष्ठान्त्यपर्वे भवति, अनन्तरं 4 घटीक्रमेण अष्टघटीं यावत् द्वादशीतिथिः अनामिकान्त्यपर्वे, तथा द्वादशघटीं यावत् त्रयोदशी मध्यमान्त्यपर्वे भविष्यति। ज्ञातमिदं त्रयोदशीतिथ्यनुसारं मध्यमान्त्यपर्वमनुसारं स्थचिह्नरेखानुसारं फलं कथितव्यम्।

**(ख) अगुलीनां वर्णस्थापनम्**

**ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राः स्युः करपल्लवाः।**
**कनीनिकाद्या हंसोऽपि योगवान् वर्णवर्जितः।।**

हस्ते कनिष्ठिकादितः अंगुलयः क्रमशः ब्राह्मणक्षत्रियवैश्यशूद्राणाञ्च कारकाकः इति तथाङ्गुष्ठः योगवानपि वर्णहीनः मन्यते।

**(ग) अङ्गुलीषु दिग्देशज्ञानम्**

सर्वप्रथमं तु करतले दिग्ज्ञानविषये सामुद्रिकरहस्ये कथितम्-

''पूर्वाशा करशाखासु मणिबन्धे पश्चिमा करभप्रदेशे दक्षिणाऽङ्गुष्ठान्तिके चोत्तरा दिग्भवतीति।'' मेघविजयगणिनाङ्गुलिषु दिग्ज्ञानं कथितम्-

**''तर्जनी प्रागुदग्मध्या पश्चिमा काञ्चनी स्मृताः।**
**दक्षिणानासिका मेरुर्मध्यदेशः प्रकीर्तितः।।''**

तत्र तर्जनीमध्यमानामिकाकनिष्ठासु क्रमशः पूर्वोत्तरदक्षिणपश्चिमश्चेति तथा अङ्गुष्ठे मध्यप्रदेशरिति।

पर्वसु ग्रहदर्शनम्

सामुद्रिकरहस्ये करतले ग्रहस्थानज्ञानं कथितम्-

''कनिष्ठाऽनामिकामध्यमातर्जनीमूलेषु क्रमाद् बुध-रवि-शनि-गुरुस्थानान्यङ्गुष्ठमूलोच्चस्थाने भृगोः स्थानं भौमस्य स्थाने द्वे प्रथमं गुरुशुक्रयोरन्तराले द्वितीयं त्वायुर्मातृरेखयोर्मध्ये चन्द्रस्थाने च करभप्रदेशस्थमातृरेखामारभ्य मणिबन्धपर्यन्तं भवतीति।''

तत्रापि मेघविजयगणिना हस्तसञ्जीवने अङ्गुलीनां पर्वसु ग्रहाणां स्थानमुक्तम्-

**''रविरङ्गुष्ठमध्यस्थस्तन्नखं चन्द्रमाः स्फुटः।**
**मङ्गलस्तर्जनीशीर्षे नृपासनगतो बुधः।।**
**लक्ष्म्यां गुरुः कविगौर्यो कनिष्ठायां शनिः स्मृतः।**
**हस्तपृष्ठे राहुकेतू चैवं वारास्तथा ग्रहाः।।''**

**स्पष्टार्थचक्रम् - ग्रहाः**

सूर्य चन्द्र मंगल बुध गुरु शुक्र शनि राहु केतु ग्रहाः अङ्गुलयः, अङ्गुष्ठः तर्जनी अङ्गुष्ठः मध्यमा अनामिका कनिष्ठास्तपृष्ठंतः हस्तपृष्ठ पर्वम् मध्य अन्त्य अन्त्य आदि अन्त्य अन्त्य अन्त्य पृष्ठ।

**(घ) पर्वसु द्वादशराशीनां स्थापनम्**

**काञ्चन्या: प्रथमे त्र्यंशे मेषो वृषो द्वितीयके।**
**एवमत्र क्रमे हस्तप्रेक्षातिथिरुपागता।।**
**ततो लभ्यमलभ्यं वा स्वराशिपरमेलकात्।**
**ज्ञेयं कर्कत्रयं मेरोर्नखमध्याद्यपर्वसु।।**

हस्ताङ्गुलीषु द्वादशपर्वसु मेषादिराशय: एवं निवेशिता: विद्यते। कनिष्ठाया: प्रथमद्वितीयतृतीयपर्वसु मेषवृषमिथुनाश्च इत्यत्र एवङ्क्रमे हस्तदर्शने या तिथि: प्राप्ता तदनुसारं फलं कथनीयम्। तया तिथ्या पर्वज्ञानं तेन च राशिं ज्ञात्वा तद्राशि: पृच्छकस्य स्वराशिश्चेति- तयोर्मेलकात् लभ्यमलभ्यं वा कथ्यते। एवं अङ्गुष्ठस्य आदिमध्यान्त्यपर्वसु कर्कत: राशित्रयम् ज्ञेयम्।

पूर्वोक्त-हस्तेन तिथेष्ठसाधनदृष्टान्ते त्रयोदशीतिथि: प्राप्ता या मध्यमान्त्यपर्वणि भवति। तत्र स्थराशि: धनु:। अनेन प्रकारेण पृच्छकस्य राशिधनुराश्योर्मध्ये मैत्र्यां धातु-दिशा-वर्ण- लाभो इत्यादय: धनुराशे: जातकेन कथयितुं शक्यते।

राशीनां मित्रामित्रनिर्णयमेवास्ति-

**''धराम्बुनोरग्निसमीरयोश्च वर्गे सुहृत्वं परतोऽरिभाव:।।''**

पृथ्वीजलतत्त्वयो: तथा च अग्निवायवो: तत्त्वयो: मध्ये मैत्री, अन्यथा शत्रुभाव: अस्ति-

| | | | |
|---|---|---|---|
| अग्नितत्त्वम् | मेष: | सिंह: | धनु: |
| पृथ्वीतत्त्वम् | वृष: | कन्या: | मकर: |
| वायुतत्त्वम् | मिथुनम् | तुला | कुम्भ: |
| जलतत्त्वम् | कर्क: | वृश्चिक: | मीन: |

**राशिस्थानविषये सामुद्रिकरहस्येऽपि कथितम्**

''तर्जनी प्रथमे पर्वणि मेष:, द्वितीये वृषस्तृतीये मिथुनम् एवं मध्यमायां प्रथमे मकर:, द्वितीये कुम्भ:, तृतीये मीन:, अनामिकायां क्रमश: पर्वसु कर्कसिंहकन्या: कनिष्ठापर्वसु तुलावृश्चिकधनुस्थानानीति राशिस्थानानि।''

**मूकप्रश्नानां स्वरूपनिर्णयम्**

**मुष्टिप्रश्नं वेति-**

यदा पृच्छक: दैवज्ञं प्रतिगच्छति मुष्टिप्रश्नं करोति, तदा पूर्वोक्तानुसारं या तिथि: यस्मिन् पर्वे उपागता। तदनुसारं लाभालाभस्य मुष्टिप्रश्नस्य वस्तो: निर्णयं कर्तव्यम्। प्रश्ना: धातु-मूल-जीवैश्च सम्बन्धिता: भवन्ति।

सामुद्रिकशास्त्रे धातुमूलजीवै: तात्पर्य: जातकशास्त्रेण प्रश्नशास्त्रानुसारेणेव मन्यन्ते। इदं सर्वं जगत्

धातुमूलजीवैः परिव्याप्तमस्ति। यदि वयं समग्रविश्वस्य वर्गीकरणं कुर्मः, तर्हि धातुमूलजीवस्वरूयं वर्गत्रये विभक्तं दृश्यते।

प्रश्नशास्त्रे अपहृतवस्तुविचारे, चोरिद्रव्यादिनिर्णये, नष्टप्राप्तिप्रसंगे, मूकप्रश्नविचारे समुत्तरविधौ आचार्यैः वस्तूनि धातुमूलजीवत्रिभिः संज्ञत्वेन निर्दिष्टानि।

**धातुर्मूलं तथा जीवं त्र्यंशका विषमाङ्गुलेः।**
**समायाः खलु मायायाः जीवो मूलं च धातवः।।**

कनिष्ठामध्यमाङ्गुष्ठानाञ्च अर्थात् विषामङ्गुलीनां पर्वसु क्रमेण धातुमूलजीवानाञ्च तथा च समाङ्गुल्योः अनामिकातर्जन्योः पर्वसु विपरीतक्रमेण जीवमूलधातूनाञ्च स्थितिः कथित।

**स्पष्टार्थचक्रम्**

| | | | |
|---|---|---|---|
| विषमाङ्गुलयः (पर्वाणि) | आदिः | मध्यः | अन्त्यः |
| समाङ्गुलयः (पर्वाणि) | अन्त्यः | मध्यः | आदिः |
| स्थितिः | धातुः | मूलः | जीवः |

तस्मिन् प्रश्नसमये यस्य पर्वणः स्थितिः स्यात् तदनुसारं प्रश्नोत्तरं भवति। यथा पूर्वोक्तोदाहरणे मध्यमान्त्यपर्वणः स्थितेरनुसारं जीवसम्बन्धितप्रश्नः इति कथयितुं शक्यते।

**मन्देन्दूरगभौमाः स्युर्धातूसवितृभार्गवौ।**
**मूलं जीवश्च सौम्यश्च जीवं प्राहुर्महाधिपः।।**

**1. धातुस्वरूपम्**

धातोः प्रकारद्वयम्-धाम्यम् अधाम्यश्चेति अग्निना प्रज्वालमानाः धाम्यधातवः यथा-स्वर्णरजतताम्रलौहश्चादयः। अग्निना न प्रज्वालमानारधाम्यधातवः यथा प्रस्तरमुक्तकहीरा-पारारसायनपोटाशियमसोडियमश्चान्यखनिजधातवरादयः।

अर्थात् भूगर्भतः प्राप्तव्याः समस्तपदार्थाः धातुसंज्ञया प्रायेण व्यवह्रियन्ते। अत्र चन्द्रभौमौ धाम्यधातूनां तथा शनिराहू अधाम्यधातूनामधिपती भवतः।

**2. मूलस्वरूपम्-**

मूले तृणदूर्वातः वृक्षवनस्पत्यादिपर्यन्तं सर्वं वनस्पतिजगत् स्वीक्रियते। मूलस्य प्रकारत्रयम्-वृक्षगुल्मलतावल्लीकन्दाश्च। आम्रशीशमादयः वृक्षाः सूक्ष्मवृक्षाः बेरकीकरबबूलश्चेत्यादयः गुल्माः। लौकीतौरईपेठाश्चादयः लताः। गोधूमधानश्चादयः वल्लयः। भूमिं खनित्वा उत्पन्नशलजमगाजरश्चादयः कन्दाश्चेति।

अस्मात् परं प्रायशः जीवने प्रयुक्तपदार्थाः व्यापारिकवस्तूनां वनस्य भूमीत्यादीनाञ्च निर्धारणं मूलैव कर्तव्यम्। अत्र सूर्यशुक्रौ मूलसंज्ञकौ ग्रहौ।

**3. जीवस्वरूपम्-**

जीवम् अर्थात् प्राणयुतं यत् तत् जीवम्। चतुर्विधं जीवम्- द्विपदः- चतुष्पदः-बहुपदः- अपदः। द्विपदाः मनुष्याः पक्षिणः देवाः राक्षसाश्चैत्यादयः, चतुष्पदाः गावः- महिषयः- सिंहाः- श्वानाः हरिणश्चादयः बहुपदाः जूकाः- लीक्षाः- भ्रमराश्चादयः, अपदाः सर्पाः शंखाश्चादयः सन्ति। अत्र गुरुबुधश्च समस्तजीवानामधिपतयः।

अन्यग्रन्थे भुवनदीपके धातुमूलजीवानां पृथक् प्रकारेण वर्गीकरणमस्ति। यथा-

**मूलं द्विविधम्-** जलजं स्थलजम्। तत्र जलजं मूलेषु श्रृंगाटकवराटकादयः नदीसमुद्रान्तः समुत्पन्नाः सर्वे फलपुष्पादयः सन्ति। तथा च स्थलजेषु सर्वं कृषिद्वारा समुत्पादितं धनधान्यादिकं पर्वतोपत्यकादिषु समुत्पन्नमपि मूलम्।

**जीवमपि त्रिविधम्-** अण्डजाः स्वेदजाः जटायुजाश्च। अण्डजाः कुक्कुटचटकादिपक्षिणः, स्वेदजाः जूकादयः, जरायुजाः पशवः मनुष्यादयश्च।

अनेन प्रकारेण ज्योतिषशास्त्रस्य अनेकैः आचार्यैः प्रायः स्व-स्वग्रन्थेषु धातुमूलजीवादिविषये ग्रहाणां वर्गीकरणमेव कृतमस्ति। तत्र जातकग्रन्थेषु-बृहज्जातके उक्तं ग्रहाणां धातुत्वम्-

**ताम्रं स्यान्मणिहेमयुक्तिरजतान्यकच्चि मुक्तायसी।**
**अर्कस्य ताम्रं मणयो हिमांशोर्भौमस्य हेमेन्दुसुतस्य युक्तिः।।**

**अन्यत्र -**

**"जीवस्य रौप्यं स्वगृहे स्थितस्य तस्यैव हेमोशनस्य मुक्ता।**
**तीक्ष्णांशुदेहप्रभवस्य सीसं कृष्णायसं च प्रवदन्ति तज्ज्ञाः।।"**

**धातुमूलजीवादीनां भेदाः**

**धातूनां भेदाः-**

**"धातुप्राप्तौ यदङ्गुल्यां यो ग्रहस्तस्य धातवः।**
**सीसकं भोगिनो मूले मध्ये ताम्रं रविस्थिते।।**
**मूर्ध्नि तारं चन्द्रचाराद् ग्रहाणां सप्तधातवः।**
**ताम्रं तारं रीति नागो हेम बगौ च तीक्ष्णकम्।।**
**कांशकं वृत्तलोहं च राहोः केतोश्च यत्स्मृतम्।**
**लपोद्वितीयत्र्यंशे तु मध्यायां वृत्तलोहकम्।।"**

पूर्वोक्तप्रकारणे यस्यामङ्गुल्यां धातुः प्राप्तः तत्र यः ग्रहः, तत्सम्बन्धितधातुः ज्ञातव्यः।

अंगुष्ठादिमध्यान्त्यपर्वसु क्रमशः बुधसूर्यचन्द्राणाञ्च सीसकं- ताम्रं-मौक्तिकमपि चिन्तयितव्यम्।

तदनुसारं फलमिति। यत्र राहोः कौशकं, केतोः वृत्तलौहकं धातुः कथितं। तत्र कनिष्ठमध्यपर्वणि राहोः तथा च ततः सप्तमस्थाने मध्ययामध्यपर्वणि केतोः स्थितिः कथयितव्य।

**स्पष्टार्थचक्रम्–**

ग्रहाः– सूर्यः चन्द्रः भौमः बुधः जीवः शुक्रः शनिः राहुः केतुः।

धातवः–ताम्रं मौक्तिकं रीति सीसकं स्वर्णः बंगः लौहं कांशकं लौहकं ।

अनेन प्रकारेण प्रश्नकालसम्बन्धितपर्वणा राशितिथि–धातुदिशावर्णादीत् ज्ञातुं शक्यते।

**मूलानां भेदाः–**

**"मूले मूलं शनेः राहोः पत्रं शुक्रे कुजे गुरौ।**
**फलं च चन्द्रभानुभ्यां शेषे पुष्पं विनिर्दिशेत्।।"**

यदि प्रश्नस्वरूपं मूलं स्यात् तर्हि अंगुलीपर्वे विद्यमानग्रहस्वरूपप्रकृतिगुणानुसारेण अस्य विशेषनिर्धारणं कर्तव्यम्। शनिराहोः प्रश्नं मूलं, शुक्रभौमगुरूणां पर्णं, चन्द्रसूर्ययोः फलं, केतुबुधयोः पुष्पमिति ज्ञातव्यम्।

**जीवानां भेदाः–**

**"एवं जीवेऽपि संप्राप्ते ग्रहैर्वाच्योऽस्य निर्णयः।**
**चन्द्रे देवाश्च तिर्यञ्च कुजे दैत्याः शनेस्तिथौ।।"**
**राहोस्तिथौनारकाः स्युः शेषे तु मनुजाः स्मृताः।**
**मनुष्येऽप्यथ संप्राप्ते पञ्चमाया लघु क्रमात्।।**
**बालं कुमारं तरुणं पमं वृद्धं विचिन्त्येत्।**
**इत्यादि शेषं सर्वं स्यादत्र चूडामणाविव।।"**

यदि प्रश्नस्य स्वरूपं जीवमागच्छेत् तदा ग्रहाणां प्रकृत्यनुसारं तत्स्वरूपं कथनीयम्। चन्द्रेण देवाः, भौमेन पक्षिणः, शनिना राक्षसाः, राहुना नारकाः निकृष्टाः, शेषग्रहैः मनुष्याः ज्ञातव्याः।

मनुष्याणां स्थित्यां सति क्रमशः कनिष्ठातः अग्रेः बाल्य–कुमार–तरुण–प्रौढ–वृद्धावस्थाः ज्ञातव्याः।

**स्पष्टार्थचक्रम्–**

| | | | | | |
|---|---|---|---|---|---|
| अङ्गुलयः | कनिष्ठा | अनामिका | मध्यमा | तर्जनी | अङ्गुष्ठः |
| अवस्थाः | बालः | कुमारः | युवा | प्रौढः | वृद्धः |

**मूकप्रश्नम्–**

**"कस्य पार्श्वेऽथवा ग्रामे कस्मिन्मे लभ्यसंभवः।**
**इति प्रश्नेऽङ्गुलीभागा मेषाद्या द्वादशोदिताः।।"**

कस्यां दिशि ग्रामे स्थाने अभीष्टफलं प्राप्स्यति, अस्य निर्णयात् पूर्वे प्रश्नस्वरूपनिर्णयमावश्यकं वर्तते। तदनन्तरं पर्वसु राशिस्थापना–ग्रहस्थापनादिभिन्न–भिन्नविषयाणां निर्णयमावश्यकं करणीयम्।

*संस्कृत शिक्षिका, दिल्ली सरकार*

# 21 दिवसीय ज्योतिष एवं वास्तु प्रशिक्षण शिविर के समापन समारोह की कुछ झलकियाँ





















प्रकाशक : **विश्वगुरुदीप आश्रम शोध संस्थान,** कीर्ति नगर, श्याम नगर, सोढाला, जयपुर
Mail Id. : vishwagurudeepashram@gmail.com • jaipur@yogaindailylife.org
Website : https://www.vgda.in • Youtube : www.youtube.com/c/vishwagurdeepashram

Narayan